# अद्वैतशास्त्रदिशा क्रममुक्त्यङ्गीकारे उपपत्तयः

## Advaitaśāstradiśā kramamuktyaṅgīkāre upapattayaḥ

**Dr. Kartik Mete**
Assistant Professor, Dept. of Sanskrit
Government General Degree College, Kalna-1
Purba Bardhman, West Bengal, India
Email: kartikmete@gmail.com

**Abstract:** तत्त्वज्ञानेन अविद्याकामकर्मनिवृत्तिद्वारा आत्यन्तिकशरीरनिवृत्तिं जन्मबन्धनिवारणेन कश्चित् मोक्षकामी कश्चित् भवति। विदेहमुक्तस्य गत्यागती न स्तः। "अत्र ब्रह्म समश्नुते। न तस्य प्राणाः उत्क्रामन्ति" इत्यादिश्रुतेः जन्मबन्धविनिर्मुक्तस्यास्य गमनागमनं नास्ति। ब्रह्मलोकगमनं तस्य नोपपद्यते। तस्मात् क्रममुक्तिः विदेहमुक्तौ नान्तर्भवति। तस्मात् भिन्नम्। जीवन्मुक्तौ अपि क्रममुक्तिः नान्तर्भूता। कुतः इति उच्यते लिङ्गशरीरे कारणशरीरे अहंत्वममत्वाभिमानः नास्ति। क्रममुक्तस्य तु अस्ति। एवं जीवन्मुक्तौ अपि तस्य नान्तर्भावः। तस्मात् ब्रह्मलोकप्राप्तिरूपा क्रममुक्तिः तृतीया काचित् गतिः यया उत्तरकाले साधकः श्रवणमनननिदिध्यासनेन क्रमेण विदेहमुक्तः स्यात् इति। इयञ्च क्रममुक्तिः अधिकारिभेदात् कर्मनाशभेदात् साधनभेदात् गत्यागतिभेदात् च अद्वैतनये उपपद्यते इति आलोच्यमानस्य प्रबन्धस्यास्य विषयसारः।

**Keywords:** गत्यागतिः, क्रममुक्तिः, ब्रह्मलोकः, सगुणब्रह्मविद्या, सगुणब्रह्मोपासना, पञ्चाग्निविद्या।

**उपोद्घातः—**

श्रुतिशिखरस्थानीयम् अखण्डधीगोचररूपं तत्त्वं प्रतिपाद्यते अद्वैतशास्त्रे। तच्च तत्त्वम् "अहं ब्रह्मास्मि" इति अहमेव सच्चिदानन्दब्रह्मस्वरूप इत्यनुभवात्मकमद्वैतज्ञानम्। अद्वैतशास्त्रेऽस्मिन् जीवब्रह्मणोरैक्यज्ञानसमकालिना देहपातात् विदेहमुक्तिः, प्रारब्धलेशाच्च इह जन्म अनुवृत्त्या उत्पन्नतत्त्वसाक्षात्कारस्य जीवन्मुक्तिः इति द्विविधा मुक्तिः भूयः कीर्त्यते। सगुणब्रह्मोपसनया ब्रह्मलोकप्राप्तिरूपा क्रममुक्तिः अपि काचित् श्रुतौ उपदिश्यते। परन्तु अद्वैतशास्त्रस्य प्रकरणादिग्रन्थेषु अन्यत्र आकरग्रन्थेषु च क्रममुक्तेः भूय आलोचनं न विद्यते। अत इयं मुक्तिः कथमुपपद्यते तत् विदेहमुक्तिजीवन्मुक्तितः भिन्ना न वेति विचारमुखेन अभ्युपगम्यते। अतो विदेहमुक्तिजीवन्मुक्तितः अस्याः भेदः कथमिति कानिचन स्थलानि प्रदर्श्यन्ते।

**गत्यागतिभेदः—**

श्रवणादिना उत्पन्नविद्यानां जीवन्मुक्तानां पूर्वोत्तरयोः सञ्चितागामिनोः कर्मणोः दाहात् प्रारब्धमात्रवशात् इह जन्म अनुवर्तते। प्रारब्धभोगे समाप्ते शरीरपातात् ब्रह्मविद् ब्रह्मैव भवति इति स्थितिः। "यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति श्रुत्या अत्र जीवन्मुक्तिस्वीकारः क्रियते। एवं जीवन्मुक्तस्य लोकान्तरगतिर्न श्रूयते। अपरा काचित् तत्त्वज्ञानोत्पत्तिसमकाले शरीरत्रयत्यागपूर्वकाविद्यानिवृत्त्युपलक्षितब्रह्मप्राप्तिरेव विदेहमुक्तिरिति वेदान्तेषु कथ्यते। "न तस्य प्राणाः उत्क्रामन्ति", "अत्र ब्रह्म समश्नुते" इत्यादिश्रुतिबलात् विदेहमुक्तौ गत्युत्क्रान्त्योः प्रतिषेधः क्रियते। एवं जीवन्मुक्तौ विदेहमुक्तौ च काचित् लोकान्तरगतिः न श्रुयते। छान्दोग्ये भाष्यकाराणां वचनञ्चात्र— "न च सदेकमेवाद्वितीयमित्येवंप्रत्ययवतां मूर्धन्यया नाड्याऽर्चिरादिमार्गेण गमनम्" इति।[1] "तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न...स एतान्ब्रह्म गमयति" इति श्रुत्या सगुणब्रह्मोपासकस्य ब्रह्मलोकगतिरूपा क्रममुक्तिस्तु श्रूयते। अतः क्रममुक्तिरूपः तृतीयः मुक्तिप्रकार उपपद्यते।

**कर्मनाशभेदः—**

क्रममुक्तिम् उपपादयितुं क्रममुक्तस्य ब्रह्मविदश्च कर्मनाशभेदो विद्यते न वेति विचारः प्रतायते। ब्रह्मविद्याफलं किमिति विचार्यमाणे मोक्ष एव परं फलमिति प्राप्नुमः। परन्तु ब्रह्माधिगमे ब्रह्मविदः संचितं क्रियमाणं कर्म च क्षीयते, न क्षीयते वेति विशये उच्यते विद्योत्पत्त्यनन्तरमेव संचितक्रियमाणं कर्म नश्यति। अत्र ब्रह्मविदः उत्तरपूर्वाघयोः अश्लेषविनाशौ भवतः इति तदधिगमाधिकरणे प्रतिपादितम्।[2] ज्ञानात्पूर्वमस्मिन् जन्मनि जन्मान्तरे वा कृतं कर्म संचितं कर्मेत्युच्यते। ज्ञानादूर्ध्वं देहेन्द्रियादिवशात् कृतं कर्म उत्तरकर्म उच्यते। अत्र तु संचितागामिकर्मणां अश्लेषविनाशौ प्रतिपादितौ। पुण्यस्यापि अश्लेषविनाशौ भवतः इति "उभे उ हैवैष एते तरति"[3] इति श्रुतिव्यपदेशात् इतरसंश्लेषाधिकरणे[4] प्रोक्तम्। एवं "क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इति श्रुतिबलात् ब्रह्मविदः पुण्यपापकर्मणां नाशो नियमेन भवति। इदानीम् अनारब्धकर्मवत् आरब्धकार्ययोः सुकृतदुष्कृतयोः विनाशो भवति न वेति विशये "क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इति श्रुतिबलेन नाशो भवतीति पूर्वपक्षः। सिद्धान्तस्तु आरब्धसुकृतदुष्कृते न नश्यतः, प्रवृत्तफलत्वात् मुक्तेषुवत्। प्रवृत्तफलस्य कर्मणः प्रतिबन्धासम्भवात् प्रारब्धकर्म न क्षीयते। ज्ञानोत्पत्तिपर्यन्तम् अप्रवृत्तफले अनारब्धकार्ये संचिते पुण्यपापे ते एव ज्ञानान्नश्यतः। आरब्धकर्मणां नाशः कथं नेति उच्यते अनारब्धाधिकरणभाष्ये— "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये इति शरीरपातावधिकरणात् क्षेमप्राप्तेः" इति। एवं प्रारब्धकर्मजन्यस्य ब्रह्मज्ञानायतनस्य शरीरस्य नाशात् जीवन्मुक्तः परब्रह्मणि लीनो, विदेहमुक्तो भवतीति। ब्रह्मज्ञानेन प्रारब्ध नाशो न भवति इत्यत्र भाष्यवाक्यं हि— "इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावाज्ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत तत्र शरीरपातप्रतीक्षां नाचक्षीत"[5] इति। एवं कर्मनाशो दृश्यते जीवन्मुक्तस्य विदेहमुक्तस्य च। क्रममुक्तस्य तु केवलं

ब्रह्मलोकप्राप्त्या न हि ब्रह्मज्ञानं सिध्यति। ब्रह्मज्ञानेनैव अशेषकर्मक्षयः। अतः क्रममुक्तस्य कर्मलेशो विद्यते एव।

**साधनभेदः—**

मुक्तिरेव चतुर्षु पुरुषार्थेषु परमपुरुषार्थ इति गण्यते। अद्वैतशास्त्रस्य जीवन्मुक्तौ विदेहमुक्तौ च साक्षात्साधनं जीवब्रह्मणोरैक्यरूपं ज्ञानमिति स्वीक्रियते। अस्य ज्ञानस्योत्पत्तये च साधननानि त्रीणि सन्ति। तानि यथा अन्तरङ्गसाधनानि, सहकारिसाधनानि, परम्परासाधनानि चेति। मोक्षं प्रति अन्तरङ्गसाधनानि भवन्ति श्रवणमनननिदिध्यासनानि। सहकारिसाधनानि तु श्रवणादीनामुपोद्बलकानि श्रवणाद्यनुष्ठानकाले सदा भवितव्यानि साधनचतुष्टयनाम्ना शास्त्रे प्रसिद्धानि चत्वारि साधनानि। तानि च नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषद्कसम्पत्तिः, मुमुक्षत्वञ्चेति। परम्परासाधनानि तु यैः साधनैः साधनचतुष्टयसिद्धिर्भवति तानि गृह्यन्ते। ध्यानं, जपः, उपासनं, निष्कामकर्म, तपः, दानम् इत्यादीनि। एवं प्रथमं मोक्षेच्छुः साधकः निष्कामकर्मादि परम्परासाधनम् अनुतिष्ठति। ततः स निर्मलान्तःकरणो भवति। ततः सहकारिसाधनं साधनचतुष्टम् अवाप्नोति। तेनोबृंहितः स श्रवणादिकमभ्यसति, ततः ब्रह्मविद्योदयेन मोक्षः इति क्रमो विद्यते।

ब्रह्मलोकप्राप्तौ क्रममुक्तौ तु सगुणब्रह्मविद्या एव परमं साधनमिति गण्यते। अत्र च पञ्चाग्न्यादिविद्याप्रभृतयः ब्रह्मलोकप्राप्तये प्रकृष्टसाधनभूताः इति कीर्त्यते। एवं क्रममुक्तिः उपसनाजन्येति "स एतान्ब्रह्म गमयति" इत्यादि-श्रुतिभिः ज्ञायते। जीवन्मुक्तौ विदेहमुक्तौ च तत्त्वसाक्षात्कार एव प्रधानं साधनमित्यङ्गीक्रियते। एवं साधनभेदेनापि क्रममुक्तिः जीवन्मुक्तिविदेहमुक्तितः भिद्यते। अतः तृतीया ब्रह्मलोकप्राप्तिरूपा क्रममुक्तिः उपपद्यत एव।

**अधिकारिभेदः—**

जीवन्मुक्तौ विदेहमुक्तौ च संसारादत्यन्तं विरक्तः अधीतशास्त्रः साधनचतुष्टसम्पन्नो मुमुक्षुः अधिकारी भवति। साधनचतुष्टये सत्येव ब्रह्म जिज्ञासा उदेति, न तद्विपर्यये। तथाह्युक्तं शङ्करभगवत्पादैः जिज्ञासाधिकरणे— "तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये"[6] इति। एवं परमपुरुषार्थाय मोक्षाय अद्वैतशास्त्रे अधिकारिणा साधनचतुष्टेनावश्यं भवितव्यमिति प्रोच्यते। क्रममुक्तौ तु लोकान्तरगत्या सगुणब्रह्मोपासनया ब्रह्मलोकप्राप्तेच्छुः अधिकारी इति अधिकारिभेदः स्पष्टं दृश्यते।

**उपसंहृतिः—**

"तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न...स एतान्ब्रह्म गमयति" इत्यादिश्रुतिबलात् सगुणब्रह्मोपासनया अर्चिलोकतः क्रमेण ब्रह्मलोकप्राप्तिरूपा काचित् गतिः श्रुतौ उपदिश्यते। इयं ब्रह्मलोकप्राप्तिः उपासनाफलम्। अस्य ब्रह्मलोकप्राप्तिरूपफलस्य जीवन्मुक्तौ विदेहमुक्तौ वा अन्तर्भावः अनुपपन्नः असम्भवश्च। कुतः इति चेत् जीवन्मुक्तिविदेहमुक्त्योः गत्यभावात्। तत्त्वज्ञानेन अविद्याकामकर्मनिवृत्तिद्वारा आत्यन्तिकशरीरनिवृत्तिं जन्मबन्धनिवारणेन कश्चित्

मोक्षकामी कश्चित् भवति। विदेहमुक्तस्य गत्यागती न स्तः। “अत्र ब्रह्म समश्नुते”, “न तस्य प्राणाः उत्क्रामन्ति” इत्यादिश्रुतेः जन्मबन्धविनिर्मुक्तस्यास्य गमनागमनं नास्ति। ब्रह्मलोकगमनं तस्य नोपपद्यते। तस्मात् क्रममुक्तिः विदेहमुक्तौ नान्तर्भवति। तस्मात् भिन्ना सा क्रममुक्तिः। जीवन्मुक्तौ अपि क्रममुक्तिः नान्तर्भूता। कुतः इति उच्यते जीवन्मुक्तस्य लिङ्गशरीरे कारणशरीरे अहंत्वममत्वाभिमानः नास्ति। क्रममुक्तस्य तु अस्ति। जीवन्मुक्तः प्रारब्धकर्मलेशात् अस्मिन्नेव शरीरे जीवति। प्रारब्धक्षये च विदेहमुक्तो भवति। जीवन्मुक्तस्यापि लोकान्तरप्राप्तिः नास्तीति श्रुतौ उपदिश्यते। एवं जीवन्मुक्तौ अपि क्रममुक्तेः नान्तर्भावः। तस्मात् ब्रह्मलोकप्राप्तिरूपा क्रममुक्तिः तृतीया काचित् गतिः यया उत्तरकाले साधकः श्रवणमनननिदिध्यासनेन क्रमेण विदेहमुक्तः स्यात् इति। अतः श्रुतिप्रमाणबलादेव गतिपूर्विका ब्रह्मलोकप्राप्तिरूपा उपासनाजन्या क्रममुक्तिः स्वीकार्या भवति। अतः इयं काचित् जीवन्मुक्तिविदेहमुक्तिभिन्ना तृतीया गतिः अभ्युपपन्ना।

## Endnotes

1. उपनिषद्भाष्यम्, द्वितीयः खण्डः, पुटम् १८३।
2. ब्रह्मसूत्रस्य चतुर्थाध्यायस्य प्रथमपादस्य नवमम् अधिकरणम्।
3. बृहदारण्यकोपनिषद् – ४-४-२२
4. ब्रह्मसूत्रस्य चतुर्थाध्यायस्य प्रथमपादस्य दशमम् अधिकरणम्।
5. ब्रह्मसूत्रशाङ्करभाष्यम्, ब्र.सू. ४-१-१५, शा.भा., पुटम् ८५०।
6. ब्रह्मसूत्रशाङ्करभाष्यम्, ब्र.सू १-१-१, शा.भा., पुटम् ३७।

## Bibliography


- *ब्रह्मसूत्रशाङ्करभाष्यम् (भामती-रत्नप्राभा-आनन्दगिरि-समुपेतम्)*। शास्त्री, जगदीश (सम्पादकः)। वाराणसी : मोतिलाल-बनारसीदास। २०१०।
- *उपनिषद्भाष्यम् (प्रथमः खण्डः)*। शास्त्री, एस. सुब्रह्मण्य (सम्पादकः)। वाराणसी : श्रीदक्षिणामूर्ति-मठ-प्रकाशन। २०११।
- *उपनिषद्भाष्यम् (द्वितीयः खण्डः)*। शास्त्री, एस. सुब्रह्मण्य (सम्पादकः)। वाराणसी : श्रीदक्षिणामूर्ति-मठ-प्रकाशन। २०१२।
- *उपनिषद्भाष्यम् (तृतीयः खण्डः)*। शास्त्री, एस. सुब्रह्मण्य (सम्पादकः)। वाराणसी : श्रीदक्षिणामूर्ति-मठ-प्रकाशन। २०११।
- *श्रीमद्भगवद्गीता (अष्टटीकोपेता)*। शर्मा,वासुदेव-लक्षण-पणशीकर (सम्पादकः)। दिल्ली : चौखम्बा-संस्कृत-प्रतिष्ठान। २००९।
- *छान्दोग्योपनिषद्* (प्रथम-भाग)। सांख्यवेदान्ततीर्थ, दुर्गाचरण (सम्पादकः)। कलकाता : देव-साहित्य-कुटीर-प्राइभेट-लिमिटेड। २००८।
- *छान्दोग्योपनिषद् (द्वितीय-भाग)*। सांख्यवेदान्ततीर्थ, दुर्गाचरण (सम्पादकः)। कलकाता : देव-साहित्य-कुटीर-प्राइभेट-लिमिटेड। २००८।